# Shriramakrishna Paramahansopanishadam

# શ્રીરામકૃષ્ણ પરમહંસોપનિષત્

## Document Information

Text title : rAmakRiShNa paramaha.nsopaniShadaM

File name : raamakrishnopanishat.itx

Category : upanishhat

Location : doc_upanishhat

Author : Swami Harshananda Puri

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : modern inspired upanishat by Swami Harshananda Puri

Latest update : Dec. 26, 1997

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીરામકૃષ્ણ પરમહંસોપનિષત્

ॐ સહ નાવવતુ ।
સહ નૌ ભુનક્તુ ।
સહ વીર્યં કરવાવહૈ ।
તેજસ્વિ નાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ॐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ॐ અથ શ્રીરામકૃષ્ણ પરમહંસોપનિષદં
વ્યાખ્યાસ્યામઃ ।
સૈષાઽપરોક્ષાનુભવરૂઢા સાધનપ્રધાના ચ ॥ ૧॥

નિર્ગુણં નિરાકારં ચ પરં બ્રહ્મ ।
તદેવ ભક્તજનાનાં શીતલ ભક્તેઃ પ્રભાવાત્
સગુણઃ સાકારઃ પરમેશ્વરો ભવતિ હિમમિવ
જલાત્ શૈત્યાત્ ।
સ એવ પરમેશ્વરો નિખિલજગદંતર્યામી ચ ॥ ૨॥

રામ-કૃષ્ણ-શિવ-વિષ્ણુ-ગૉડલ્લેત્યાદિ
વિવિધનામભિર્નિર્દિષ્ટં પરંતત્ત્વમપિ સ એવ ।
સ એવ લક્ષ્મી-દુર્ગા-કાલી-સરસ્વતીત્યાદિ
દેવીનામભિરપિ નિર્દિશ્યતે ॥ ૩॥

વ્યવહારદશાયાં યત્ર પુરુષોઽજ્ઞો દ્વૈતમિવ
પશ્યતિ તદા કાલ્યાદિ દેવ્યઃ પરસ્યૈવ બ્રહ્મણઃ
શક્તય ઇતિ મન્તવ્યમ્ । દાહિકશક્તિર્યથાગ્નેઃ ।
વસ્તુતસ્તુ તયોરત્યંતમભેદઃ એવ ॥૪॥

પરમેશ્વરદર્શનમેવ માનવ જીવનસ્ય ચરમોદ્દેશઃ ।
તથૈવ મુક્તેઃ સાધ્યત્વાત્ ।

પરમેશ્વરસ્તુ દ્રષ્ટું સ્પ્રષ્ટું ચ શક્યઃ ।
તેન સહાલાપોઽપિ સાધ્યઃ ।
સર્વે ધર્માઃ સમાનાસ્તમેવ ગમયંતિ ચ ॥ ૫॥

અપિ તુ માયાજવનિકાચ્છન્નઃ સ સુખેન દ્રષ્ટું
ન લભ્યઃ ।
કામકાંચન કામનૈવ માયા ।
તદપગમે સઃ સ્વયમેવાવિર્ભવતિ મેઘાપાયેઽશુમાનિવ ।
જ્ઞાનમિશ્રિત ભક્તિશ્ચ માયાનાશોપાયઃ ।
સ એવ સર્વમિત્યતો દીનદરિદ્રરોગ્યજ્ઞાદીનાં
નારાયણદૃષ્ટ્યા સેવાઽપ્યદ્યતનકાલેઽ-
અનુત્તમોપાયશ્ચિત્તશુદ્ધિદ્વારા તં
સાક્ષાત્કર્તુમ્ ॥ ૬॥

કથંચિત્તં જ્ઞાત્વા દૃષ્ટ્વા સ્પૃષ્ટ્વા
ભવબન્ધનાદ્વિમુક્તા ભવત ।
વિમુક્તા ભવતેત્યુપનિષત્ ॥ ૭॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

॥ ઇતિ સ્વામી હર્ષાનન્દકૃત ઉપનિશત્સમાપ્તા ॥

Encoded and proofread by Sunder Hattangadi

*Shriramakrishna Paramahansopanishadam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*